# विभक्तिः

१९ – ०७.०५.२०१६

## व्योम-संस्कृत-पाठशाला
## www.sanskritfromhome.in

# मङ्गलम्

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमूः रामाय तस्मै नमः।
रामात् नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर॥

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# मङ्गलम्

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो॥

# पुनरावर्तनम्

- पञ्चमीविभक्तिः
  - अपादानम् १ – विभागस्य अवधिः।
  - वृक्षात् पतति, ग्रामात् आगच्छति, शालायाः आनयति।
  - अपादानम् २ – भयस्य/रक्षणस्य कारणम्।
  - व्याघ्रात् भीतः, परीक्षायाः त्रस्त्रः, चोरात् रक्षति, दुष्टात् त्रायते।
  - अपादानम् ३ – नद्याः प्रभवः।
  - हिमालयात् प्रभवति, भागमण्डलात् प्रभवति।

# पुनरावर्तनम्

- पञ्चमीविभक्तिरूपाणि
  - बालात्  बालाभ्याम्  बालेभ्यः
  - मित्रात्  मित्राभ्याम्  मित्रेभ्यः
  - बालिकायाः  बालिकाभ्याम्  बालिकाभ्यः
  - नार्याः  नारीभ्याम्  नारीभ्यः

# सर्वनाम्नां पञ्चमीविभक्तिरूपाणि

| | | |
|---|---|---|
| तस्मात् | ताभ्याम् | तेभ्यः |
| तस्याः | ताभ्याम् | ताभ्यः |
| एतस्मात् | एताभ्याम् | एतेभ्यः |
| एतस्याः | एताभ्याम् | एताभ्यः |
| मत् | आवाभ्याम् | अस्मत् |
| त्वत् | युवाभ्याम् | युष्मत् |

# अभ्यासः – १ (सर्वेषु वचनेषु)



# अभ्यासः – २ (सर्वेषु वचनेषु)




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३ (सर्वेषु वचनेषु)




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# उपपदपञ्चमी - बहिः

- गृहात् बहिः उद्यानम् अस्ति।
- शालायाः बहिः क्रीडाङ्गणम् अस्ति।
- जलात् बहिः मीनः न जीवति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ४

- ग्रामः – नदी प्रवहति।
- द्वारम् – भटः अस्ति।
- देवालयः – प्राकारः अस्ति।
- प्रकोष्ठः – जनाः उपविशन्ति।
- गृहम् – शुनकः अस्ति।
- स्थानकम् – यानं तिष्ठति।
- अयोध्या – सरयूनदी प्रवहति
- काशी – गङ्गा प्रवहति
- मथुरा – यमुना प्रवहति
- काञ्ची – वेगवती प्रवहति
- द्वारका – गोमती प्रवहति
- धर्मपुरी – गोदावरी प्रवहति

# उपपदपञ्चमी – पूर्व/पर

- चैत्रः वैशाखात् पूर्वः ।
- रामः लक्ष्मणात् पूर्वः ।
- फेब्रवरीमासः जनवरीमासात् परः ।
- स्नानात् पूर्वं दन्तधावनं करोति।
- भोजनात् परं निद्राति।

# अभ्यासः – ५ (पूर्वः/परः)

- चैत्रः
- वैशाखः
- ज्येष्ठः
- आषाढः
- श्रावणः
- भाद्रपदः
- आश्वयुजः
- कार्त्तिकः
- मार्गशीर्षः
- पुष्यः
- माघः
- फाल्गुनः

# अभ्यासः – ६ (पूर्वम्/परम्)

- उत्थानम्
- दन्तधावनम्
- स्नानम्
- देवपूजनम्
- अल्पाहारः
- शालागमनम्
- क्रीडनम्
- पठनम्
- गृहकार्यस्य लेखनम्
- स्तोत्रकथनम्
- भोजनम्
- निद्रा

# उपपदपञ्चमी – ऋते/विना

- जलात् ऋते/विना मीनाः न जीवन्ति।
- रामात् ऋते/विना कः रक्षति?
- भगवत्याः ऋते/विना शरणं नास्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ७ (ऋते/विना नास्ति)

- व्याकरणम् – शब्दज्ञानम्
- ज्ञानम् – कैवल्यम्
- धनम् - जीवनम्
- श्रमः – सिद्धिः
- व्यायामः – आरोग्यम्
- प्रकाशः - छाया
- विद्या – विवेकः
- दया – धर्मः
- धारणा - ध्यानम्
- पार्वती – परमेश्वरः
- लक्ष्मीः – नारायणः
- सरस्वती - ब्रह्मा

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# पञ्चमीविभक्तिः – सङ्क्षेपः

- अपादाने पञ्चमी
  - विभागस्य अवधिः। वृक्षात् पतति। ग्रामात् आगच्छति।
  - भयस्य कारणम्। व्याघ्रात् बिभेति। चोरेभ्यः रक्षति।
  - नद्याः प्रभवः। हिमालयात् गङ्गा प्रभवति।
- उपपदपञ्चमी
  - बहिः। गृहाद् बहिः। शालायाः बहिः।
  - पूर्व/पर। चैत्रः वैशाखात् पूर्वः। स्नानात् परं भोजनं करोति।
  - ऋते/विना। ज्ञानाद् ऋते कैवल्यं नास्ति। जलात् विना मीनाः न जीवन्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# रटनम्

व्योम-संस्कृत-पाठशाला ©2015। www.sanskritfromhome.in | www.vyomalabs.in |